2468

ग्रं. नं. ७२ संस्कृतवेदान्त

गौडपाद – उत्तरगीताव्याख्या

४६४/८

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥ॐ॥

॥अथउत्तरगीतासटीकप्रारंभः॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

५ ज्ञातुं भगवंतं पृच्छति ॥ अर्जुन उवाच ॥ यदेक इति ॥ मुल यदेकं निष्कलं ब्रह्म व्योमातीतं निरंजनं ॥ ३

॥ श्रीगणेशाय नमः ॥ श्रीसच्चिदानंदाय नमः ॥ अखंड सच्चिदानंदमवाङ्मनसगोचरं ॥
आत्मानमखिलाधारमाश्रये भीष्टसिद्धये ॥ १ ॥ इह खलु भगवानर्जुनः ॥ धर्मक्षेत्रे कुरुक्षे
त्रे भगवदुपदिष्टमात्मतत्वोपदेशं ॥ विषयभोगप्रवणे न विस्मृत्य स पुनस्तदेवात्मतत्वं अप्रत
र्क्यमविज्ञेयं विनाशोत्पत्तिवर्जितं ॥ कारणं योग निर्मुक्तं हेतुसाधनवर्जितं ॥ हृदयांबु
जमध्यस्थं ज्ञानंज्ञेयस्वरूपकं ॥ तत्क्षणादेव मुच्येत यं ज्ञात्वा नाद्भुहि केशव ॥ २ ॥ हि केशवाय त
...नात्यस्य ब्रह्मणः सम्यक् ज्ञानात् तत्क्षणादेव ज्ञानोत्तरक्षणे देव मुच्येत ॥ अविद्या
निवृत्तिद्वारा आनंदावाप्तिर्भवेत् तद्ब्रूहि स्वरूपतटस्थलक्षणाभ्यां प्रतिपादयेत्य
र्थः ॥ तदेव लक्षणैर्दर्शयति ॥ यदेकमित्यादिना ॥ एकं सजातीयविजातीयस्वगतभे
दरहितं ॥ निष्कलं अवयवरहितं ॥ व्योमातीतं ॥ आकाशादिचतुर्विंशतितत्त्वातीतं नि

Margin notes: ॥ १ ॥ ज्ञा त ति ॥ १ ॥ न

(2A)

त

रंजनंस्वप्रकाशं॥अप्रतर्क्यमनोगोचरं। यन्मनोनमनुइतिश्रुतेः॥अविज्ञेयंप्रमाणा
विषयं॥यद्वाचानिरुक्तं यतोवाचोनिवर्ततेतिश्रुतेः॥विनाशेसत्तिवर्जितंत्रैकालिकं
सन् कारणं॥सर्वोत्पत्तिनिमित्तोपादनभूतं॥योगनिर्मुक्तं॥वस्त्वंतरसंबधरहितं हेतुसाधन
धर्म वर्जितंनिमि त्तोपादनत्ववर्जितमित्यर्थः॥स्वस्वस ता तनत्वेनताभ्यामेववि
वर्जितमितिच॥हृदयांबुजमध्यस्थं॥सर्वलोकांतःर्नियामकतयासर्वलोकहृदयमध्य
स्थं॥ज्ञानज्ञेयस्वरूपकं ज्ञानंविषयप्रकाशःज्ञेयंविषयः॥तदुभयस्वरूपंतदुभयसत्ता
त्मकं॥यद्ब्रह्म कीदृशमितिप्रश्नार्थः॥एवमर्जुनेनपृष्टोभगवान्प्रश्नार्थमभिनंद
भुत्तरमाह॥ ॥श्रीभगवानुवाच॥साधुपृष्टंमहाबाहोबुद्धिमानसिपांडव॥यन्मांपृच्छसि
तत्वार्थमशेषंप्रवदाम्यहं॥ ॥२॥हेमहाबाहोइतिसंबोधनंसर्वशत्रुनिबर्हणसामर्थ्यं

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3)

द्योतयति ज्ञात्रवोऽरागादयश्च ॥ हे पांडवेति सत्कुलप्रसूतत्वं द्योतयति ॥ बुद्धीमानसीर्
॥२॥ त्तितं स्तुवन् स्वोक्तार्थग्रहणावधारणसामर्थ्यं द्योतयति त्वं मां प्रतियदात्मतत्त्वार्थं पृछ
सि तद्शेषं यथा भवति तथा तुभ्यमहं प्रवदामि ॥ तदेवात्मतत्त्वं सोपायमाह ॥ ॥ आत्ममंत्र
स्य हंसस्य परस्परसमन्वयात् ॥ योगेन गतकामानां भावना ब्रह्म चक्षते इति ॥ ४ ॥ आ
त्मनि तात्पर्येण पर्यवसन्नस्य प्रणवात्मकस्य मंत्रस्य तात्पर्यविषयस्य हंसस्य हं इति स्व
तत्त्वज्ञानेन ज्ञातृत्वसंसारमिति हंसः ॥ त[illegible]स्य परमात्मनः [illegible]त्मनः परस्परसमन्व
याद् न्योन्यप्रतिपाद्यप्रतिपादकभावसंसर्गात् ॥ अनेन सर्ववेदांततात्पर्यगोचरत्वं तंतु ॥२॥
समन्वयादिति समन्वयाधिकरणोक्तं दर्शितं ॥ योगेनात्मतत्त्वविचाररूपेण ॥ गतकामा
नां नष्टारिषड्वर्गाणां ॥ [illegible] अनेन ज्ञानप्रतिबंधककल्मषनिवृत्तिर्दर्शिता ॥ तेषां या भा

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai

(3A)

त्रि

वनात्तत्त्वमस्यादिवाक्यजन्यं चरमवृत्तिः॥ तं ति र्वा
तन्निवृत्त्याऽविद्यानिवृ स॥ धिष्ठानं वा ब्रह्मेति चक्षते ॥ प्राहुस्तत्त्वज्ञाः इति न
शेषः॥ तदेव तत्त्वज्ञानं तन्निवृत्त्याऽविद्यानिवृत्तिं चाह शरीराणामजस्यांतं हंसत्वं पार
दर्शनं॥ हंसो हंसाक्षरं चैव कूटस्थं यत्तदक्षरं॥ तद्विद्वानक्षरं प्राप्य जह्यान्मरणजन्मनी
ज. ॥५॥ अस्य जीवस्यांतं अवध्यधिगतं हंसत्वं परब्रह्मस्वरूपत्वं॥ शरीरिणां जीवानां पा
अं रदर्शनं परमज्ञानं॥ हंसः हंसाक्षरं च प्रणवं च यत्तत्कूटस्थं यत्तदुभयं साक्षिभूतं यद
क्षरमित्युच्यते॥ अनेन त्रिविधपरिच्छेदरहितत्वं दर्शितं॥ तत्स्वरूपं विद्वान्विवेकी सन्
तदक्षरं वस्तु प्राप्य मरणजन्मनि जन्ममरणप्रवाहरूपं संसारं जह्यात् त्यजेदिति यावत्
साच मुक्तिः॥ जीवपरमैक्यं प्रतिपाद्यते॥ ॥अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यते॥ ॥

संब्रह्म ४ है          त          ब्रह्म

(५)

काकीमुखककारांतं उकारश्चेतना द्युतिः ॥ अकारस्य तु लुप्तस्य कोऽर्थः संप्रतिपद्य
ते ॥ कं चाकं च काके सुखदुःखे ते अस्य स्त इति काकी जीवः अविद्याप्रतिबिंबः ॥ तस्य
३ मुखं मुखस्थानीयबिंबभूतं यद्ब्रह्म तल्लाति पाति कं यत् ककारांतं मुखमिस्ये तत् काका
क्षिन्यायेनात्रापि संबध्यते ॥ तथा च शब्दश्लेषः ॥ मुखभूतककारस्य काकीसत्र प्राथ
मिक ककारास्यांतं अंतिमं यदक्षरं म … कारास्तकं पंचीकृतं पंचमहाभूतानि तत्का
र्याणि विराजि स्फुच्यते ॥ एतत्स्थूलशरीरमात्मनः इंद्रियैरर्थोपलब्धिर्जागरितं तदु
भयाभिमान्यात्मा विश्वः ॥ एतत्र यमकारस्यार्थः ॥ उकारश्चेतना द्युतिः ॥ काकीमु ३
खे सत्र मकारास्तरोय उकारः ॥ पंचीकृतं पंचमहाभूतानि तत्कार्याणि सप्तदश कलिं
गं हिरण्यगर्भ इत्युच्यते ॥ एतत्सूक्ष्मशरीरमात्मनः ॥ कारणेपूपसंहृते बुजागरित

मौतिकं अ२

काकीरस्यांतिमो वर्णः
अकारः तत्प्रतिपद्यत्रस्ते वेत्स्यर्थः ॥
३

(7A)

नसतद४ इउ स्प१

संस्कारं प्रत्ययः अविद्य स्वप्नस्तदुभयोंमान्यात्मा तैजसः४॥ एतत्त्रयमकारस्यार्थः॥ चे
नं२ तनाहृतिः॥ चेतस्यहिरण्यगर्भात्मकत्तैजसस्याहृतिर्वाचिकः॥ अकारस्य काकीमुखे
सत्र उकारात्स्वर्वमभिहितो योमकारः हृदं शरीरद्वयकारणमात्मात्ताज्ञानं सत्ताभासमव्या
हृतनमिसुच्यते॥ तच्चैंनासन्नान्न विसदसत्॥ न भिन्नं नाभिन्नं नापिभिन्नाभिन्नं कु
नोभयर्थके तश्चिन्निरवयवं न सावयवं॥ ब्रह्मात्मैक्य ज्ञाना नाश्यं नोद्यं सर्वप्रकारकज्ञानोप
वलं-५ संहार बुद्धेः कारणं सुषुप्तिस्तदुभयाभिमान्यात्मा प्राज्ञः एतत्त्रयं मकारस्यार्थः लुप्तस्या
कार उकार मकारः ॐकार एव लुप्तस्य कार्थः ककारास्वरोयः अकारस्तस्य
योर्थः॥ लक्ष्यस्वरूपं तत्त्वं प्रतिपद्यते तदैक्यं प्राप्नोतीर्थः॥ अयमात्मा ब्रह्म॥ स य
श्चायं पुरुषे॥ यश्चासावादित्ये॥ स एकः॥ तत्त्वमसि अहं ब्रह्मास्मि इति श्रुतिभ्य इति

ह्मना अवस्थानं४

ष्यभावः॥ काकीमुख ककारांतउकारश्चेतनाहृति अकारस्यचलुप्तस्यकोर्थसंप्रतिप
द्यते॥ १०॥ कंच अकंच काके सुखदुःखे तेअस्यस्तइति काकीजीवः॥ तलति पादकशब्दस्य
४ मुखे अग्रे यः ककारस्यांतोऽकारः ब्रह्मचेतनाहृतिः जीवाकार इत्यर्थः॥ ब्रह्मैवस्याविद्य
यासंसार इतिन्यायात्॥ अकारस्यजीवतत्वाकारस्यलुप्तस्यापगतस्यकोर्थः॥ अखंडाद्वि
तीयः सच्चिदानंदरूपोर्थः॥ एवंकाकीमुखेसाधकरूपकारेणानुसंधानवान्संप्रतिप
द्यते आत्मेत्यर्थः॥ यद्वा॥ हे काकीमुख ब्रह्मांडं त्वं ककारांतककारस्यांतिमोवर्णोऽ
कारस्तत्प्रतिपाद्यते ब्रह्मैवेत्यर्थः॥ ईकारात्मत्वप्रहृतिस्तस्य ब्रह्मणश्चेतनाचेतय ४
मानाहृतिः शक्तिः॥ अकारस्यलुप्तस्य परिणममानाविद्यालोपवतः॥ ब्रह्मणः कोर्थः
ककारात्परोयउकारःतस्ययोर्थः॥ लक्ष्यस्वरूपं तत्प्रतिपद्यते तैतदैक्यंप्राप्नोतीत्यर्थः॥ इ सं
ॐकारंतस्यब्रह्मणश्चेतनाकृति शिरितिपाठे … १ मूलप्रकृति १

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

सां श्रुतेः २ वारंवारः २

(5A) दमुपासककर्तृतिशेषः ॥ तथाच श्रुतिः ॥ अप्लावस्य प्रप्लवस्य ॥ आंडीभवतमामुः ॥ सुखादि
दुःखनिधनं प्रतिमुंचस्वस्वांपुरीमिति ॥ अस्यार्थः ॥ हे जना जननमरणयुक्तजीवत्व
माप्लवस्य जीवन्मुक्तो भव प्रप्लवस्य साक्षान्मुक्तो भव मुदुः ॥ आंडीब्रह्मांडवर्ति संसारी मा मध्यकुक्षी
भव माभूः ॥ संसारी चेत्किमपराद्धमिसारं कथाह ॥ सुखादिविषयिकसुखं हेतुं दुःखमेव नि
धने अंते यस्यास्तां स्वांपुरीं स्वकियस्थूलसूक्ष्मदेहद्वयं प्रतिमुंचस्व त्यजेत्यर्थः एवं योग
धारणयोपासकस्य प्राणायामरतस्यनां वीर्यकफलमिसाह ॥ ॥गछंतिष्ठन्यथाकालं वा सदा ४
युस्वीकरणपरं सर्वकालप्रयोगेन सहस्रायुर्भवेन्नरः ॥ ॥नरः शतायुः पुरुषः शतें
द्रिय इतिपरिमितायुपरिगछन् गमनकाले तिष्ठन् अवस्थानकाले सदाकालं सर्वस्मि
न् स्थानशयनादिकालांतरे परं विशेषणं वायुः स्वीकरणं प्राणायामं कुर्वन् ॥ तेन सर्वका

लेरि

(6)

त्प्रयोगेन सार्वकालिकवायुधारणया सहस्त्रायुः सहस्त्रवर्षजीवी न वे द्भुयादित्यर्थः
ननु परमफलं कदा भविष्यतीत्यत्राह ॥ यावत्पश्येत्खगाकारं तदाकारं विचिंतयेत् ॥ खगा
५ कारं हंसस्वरूपं यावत्पश्येत् ॥ यावत्पर्यंतं साक्षात्कुर्यात् तावत्पर्यंतं तदाकारं ब्रह्मस्वरू
पं पूर्वोक्तधारणया प्रवृद्धायुर्विचिंतयेत् ध्यायेदित्यर्थः ॥ तादृशात्मसाक्षात्कारार्थमात्म
जगतोरभेदध्यानमाह ॥ खमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु ॥ आत्मानं खमयं दृष्ट्वा
न किंचिदपि चिंतयेत् ॥ ८ ॥ खमध्ये दहराकाशमध्ये आत्मानं परमात्मानं कुरु ॥ एतदभि
न्नसत्तात्मकमिति भावयेदित्यर्थः ॥ आत्ममध्ये च परमात्मनि खं कुरु ॥ आकाशं कुरु तदुपा ५
दानं भावयेत् ॥ आत्मानं परमात्मानं खमयं आकाशमयं दृष्ट्वा किंचिदपि ब्रह्मव्यतिरि
क्तमन्यदपि न चिंतयेत् न ध्यायेदित्यर्थः ॥ यद्वा खशब्देन जीवोभिधीयते ॥ आकाशः

Joint project of the Rajwade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(6A)

शरीरं ब्रह्मेति श्रुतेः ॥ आकाशशब्देन परमात्माभिधीयते ॥ तयोरैक्यं बुध्यान किंचिदपि
चिंतयेत् एवमुक्तप्रकारेण योगी भूत्वा ब्रह्मज्ञाननिष्ठए वस्यादिसाह ॥ ॥स्थिरबुद्धि
रसंमूढो ब्रह्मविद्ब्रह्मणी स्थितः ॥ बहिर्व्योमस्थितं नित्यं नासाग्रे च व्यवस्थितं निष्कलंकं
विजानियाद्यूसो यत्र लयं गतः ॥ ९ ॥ ब्रह्मविदुक्तप्रकारेण ब्रह्मज्ञानी सन् स्थिरबुद्धिः निश्चल
[illegible]ज्ञानी भूत्वाऽसंमूढः आज्ञानरहितः सन् ब्रह्मणि स्थितः ब्रह्मनिष्ठए वनिसंयत्रश्वा
सः ॥ वायुर्लयं गतः ॥ नाशं प्रासस्तत्र नासाग्रे व्यवस्थितं बहिर्व्योमस्थितं बहिराकाशं स्थि
तं । निष्कलंकं कलंकातीतं ब्रह्म जानियात् बुध्यात् ॥ ब्रह्मज्ञाननिष्ठस्य मनोनैश्चल्यार्थं धा
रणाविशेषमाह ॥ ॥पुटद्वयविनिर्मुक्तो वायुर्यत्र विलियते । तत्र संस्थं मनः कृत्वा तं ध्या
येत्पार्थमीश्वरं ॥ ॥ ॥हे पार्थ पुटद्वयविनिर्मुक्तः नासारंध्रनिर्गतो वायुर्यत्र विलियते

कै२

(७)



लयंगछतितस्मिन्मार्गेसम्यक्स्थितंमनः॥ कृत्वातमीश्वरंध्यायेत्॥वक्ष्यमाणप्रकारेणध्या
येत्॥तमेवप्रकारमाह॥निर्मलत्वंविजानियात्षड्भिर्रहितंशिवं॥निर्मलंनिरस्ताहंकार
॥६॥ चेतनात्मकं॥अतएवषड्भिर्रहितंक्षुत्पिपासादिहीनंशिवंमंगलंस्वरूपमितिविजानियात्
ध्यायेदित्यर्थः॥किंच॥प्रभाशून्यंमनःशून्यंबुद्धिशून्यंनिरामयं॥सर्वशून्यंनिराभासंसमाधिस्त
थो५ स्यलक्षणं॥त्रिशून्यंविजानियात्सोमुच्यतेबंधनात्॥प्रभाशून्यंत्वस्यात्मकंप्रकाशाररहितंत तु५
त्रहेतुः॥मनःशून्यंमनोरथ्यम्अतएवबुद्धिशून्यमासक्तिरहितंनिरामयंनिर्व्याजंअतएवनि
हितं राभासभ्रमरहितंअतएवसर्वशून्यंस्वव्यतिरिक्तवस्तुमात्रस्यमिथ्यात्वेनानंदैकरसंय ६
द्ध्रस्तंध्यानंसमाधिः॥तस्मिन्स्थितस्यकिंलक्षणमित्याशंक्याह॥त्रिशून्यंयोविजानी
यात्सर्वोक्तप्रभाशून्यंयोविजानियात्बुध्येत्॥अनेनजाग्रदाद्यवस्थात्रयंशून्यत्वंदर्शि

दि

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(7A)

नं॥ प्रभामनोबुद्धिशब्दैः क्रमेण तासामभिधाना ...त्तादृशं ब्रह्मयो विजानियात्स समाधिस्थः तत्स
बंधनात्संसारबंधनान्मुच्यते मुक्तो भवति॥ एवंजीवन्मुक्तस्य देहादिष्वभिनिवेशो नास्तीसा
ह॥२॥ स्वयमुच्चलिते देहे देहीन्यस्त समाधिना॥ निश्चलं तं विजानियात्स समाधिस्तस्य लक्षणं॥ भ
ति॥ देहे स्वयमनादि प्रारब्धकर्मवासनावशगत उच्चलिते गमनादिकं कुर्वन्नपि देहीजी
वः न्यस्तसमाधिना निश्चलसमाधियोगेन निश्चलं यथा भवति तथा तं परमात्मानं विजानी
यात्॥ तदेव समाधिस्थितस्यात्मयोगस्थितस्य लक्षणमित्युच्यते॥ इतोप्यात्मतत्स्य लक्षणमा
ह॥ ॥अमात्रं शब्दरहितं स्वरव्यंजनवर्जितं॥ बिंदुनादकलातीतं यस्तं वेद स वेदविदिति॥
अमात्रं ह्रस्वदीर्घप्लुतरहितं शब्दरहितं शब्दातीतं स्वरव्यंजनवर्जितं अक्षरसमुदायात्मकं पदान
भिधेयं॥ बिंदुनादकलातीतं अनुस्वारः बिंदुः संघट्टे गलविवरे घंटानिर्ल्हाददर्दुरणं स

दीर्घ नी के

(8)

एतादृशं ब्रह्म यो वेद स वेदवित्
सकलवेदांततात्पर्यज्ञाता नान्य इत्यर्थः॥

नादः कलानादैकदेशः॥ तैरतीतं यथा कथंचिच्छब्दवाच्यमित्यर्थः॥ एवं प्राप्तात्मतत्त्वज्ञान.
स्य असंभावनाविपरितभावनादिनिवृत्तौ सत्यां न किंचित्कृत्यमस्तीत्याह॥ ॥ प्राप्ते ज्ञाने नवि
७ ज्ञाने ज्ञेयं च हृदि संस्थिते। लब्धशांतिपदे देहे न योगो नैव धारणा॥ ज्ञानेन परोक्षात्मकेन
विज्ञानेनापरोक्षानुभवात्मकेन यदा॥ यज्ञानेन शास्त्राचार्योपदेशजन्येन विज्ञाने अनु न
न भवात्मके प्राप्ते सति ज्ञेये च सर्ववेदांततात्पर्यगोचरे परमात्मनि हृदि संस्थिते हृद्यपरो
क्षतया भासमाने सति। देहे देहोपाधिमति जीवे लब्धशांतिपदे संप्राप्तब्रह्मभावे सति त
दनुयोगोऽपि नास्ति धारणा च नास्ति सिद्धफले साधनेन प्रयोजनाभावादिति भावः॥
॥ एवमात्मतत्त्वापरोक्षज्ञाननिर्मुक्तः सन्नीश्वर एव जायत इति तस्य स्वरूपमाह॥ यो वेदा ७
दौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः। तस्य प्रकृतिलीनस्य यः परः स महेश्वरः॥ १८॥

(8A)

अधःप्रवर्त्यनेऽस्तं ब्रह्मपरस्तच्च विज्ञेयं तइति वचनात्॥ पश्यंति मध्यमा वैखरी ३२

वेदादौ सर्ववेदानामादौ वेदस्यैं श्रृणेवेपरिहाराय निधीयमानः वेदांते च सर्ववेदानामंतेऽु

मप्युपक्रमणपरिहाराय प्रतिष्ठितः संस्थापितं ॥ चकारात्सर्ववेदरक्षणा ॥ यवेदमध्येच

निहितः प्रतिष्ठितः यः स्वरःप्रणवात्मकस्तस्यैं परावस्थायां लीनस्य यः परः परो वाक्चतुष्टय प्रणवस्य प्र

बोधकः उपलक्षणं चैतत् सर्वप्राणेंद्रियकरणवर्गप्रबोधकः ॥ सर्वनियंतं सर्वांतर्या कृतो ३१

ए मियो महेश्वर इति प्रसिद्धः सर्वात्मा तत्ज्ञानीनान्य इत्यर्थः ॥१८॥ आत्मतत्त्वापरोक्षानुभ

वात्पूर्वं यावत्साधनप्रयासः कर्तव्यः तेनात्मतस्मिन्ननुभवे न कर्तव्य इति सदृष्टांतमाह

॥ नावार्थी तु भवेन्नावद्यावत्पारं न गच्छति उत्तीर्णे च सरित्सारे नौकया किं प्रयोजनं ॥

पर ॥ यावत्पर्यंतं पारं नदीतीरें न गच्छति न संप्राप्नोति तावत्पर्यंतं नावार्थी नदीत

रणसाधनार्थी भवेत् यावत्सरित्सारे नदीतीरे उत्तीर्णे सति नावया नदीतीरसाधनेन

ण

Rajawade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(१)

किंप्रयोजनं किमपि नास्तीत्यर्थः ॥ तद्वदत्रापि आत्मापरोक्षे ज्ञाते शास्त्रादि भारैः किंप्र
भावः योजनमिति ॥ तदेवमन्यंतरेण सदृष्टांतमाह ॥ ॥ ग्रंथमभ्यास मेधावी ज्ञानविज्ञानतत्परः
८ पलालमिव धान्यार्थी त्यजेद्ग्रंथमशेषतः इति ॥ ॥ मेधावी बुद्धिमान् ग्रंथमभ्यस्य वेदांतादि
श्रवणं कृत्वा ज्ञाने सामान्यज्ञाने विज्ञाने विशेषात्तु भवेत्तत्परः सन् ग्रंथ सर्वं शास्त्रं त्यजेत् ॥
तत्र दृष्टांतः ॥ धान्यार्थी धान्यसहितं तृणमादाय तद्गतधान्यस्वीकारानंतरं पलालं गतकणि
कातृणं ॥ यथा त्यजंति तद्वदित्यर्थः ॥ ॥ किंच ॥ उल्काहस्तो यथा ज्वालं द्रव्यमालोक्य तां कश्चित्
त्यजेत् ज्ञानेन ज्ञेयमालोक्य पश्चात् ज्ञानं परित्यजेदिति ॥ कश्चिल्लोके अंधकारस्थित
द्रव्य दर्शनार्थी सन् यथा उल्काहस्तो भवति पश्चात् द्रव्यमालोक्य तदनंतरं तामुल्कां यथा ८
त्यजेत् ॥ तथा ज्ञानेन ज्ञानसाधनेन ज्ञेयं ब्रह्मालोक्यापरोक्षीकृत्य पश्चात् ज्ञानं ज्ञानसाध

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

२९

नंत्यजेदित्यर्थः॥ ज्ञातेज्ञानेयापरोक्षज्ञानेतेनप्रयोजनाभावात्॥ साधनपरित्याज्यमेत
त्दृष्टांतमाह॥ ॥यथामृतेनतृप्तस्यपयसाकिंप्रयोजनं॥ एवंतंपरमंज्ञात्वावेदैर्नास्ति
प्रयोजनं॥ ॥यथामृतेनसागरमथनोद्भूतेनतृप्तस्यसंतुष्टस्यपयसानीरेणप्रयोजनं
तं नास्ति॥ एवंपरमंज्ञात्वापरमात्मानंअपरोक्षीकृत्वा(?)वेदैः वेदांतशास्त्रादिभिः किंप्रयोज
नंनकिमपीत्यर्थः॥ किंच॥ तत्वज्ञानिनांविधिनिषेधादिकर्तव्यमपिनास्तीत्याह॥ ॥ज्ञाना
मृतेनतृप्तस्यकृतकृत्यस्ययोगिनः॥ नचास्तिकिंचित्कर्तव्यमस्तिचेन्नसतत्वविदिति॥ ॥
ज्ञानामृतेनतृप्तस्यानंदैकरसंप्राप्तस्यकृतकृत्यस्यकृतार्थस्ययोगिनः मुक्तस्यकिंचि
दपिकर्तव्यंनास्तिकिंतुलोकसंग्रहणार्थमेव॥ यद्यभिनिवेशेनकर्मासक्तिरस्तितर्हि च
सतत्वविन्नभवति॥ आरूढोपिनभवतीत्यर्थः॥ अर्थज्ञानंविनाकेवलवेदपाठमात्रेण

(१०)

वेदवित्त्वं नास्ति किंतु वेदार्थतात्पर्यागोचरब्रह्मज्ञानेनैव वेदवित्त्वमित्याह ॥ ॥ तैलधारमिवा
च्छिन्नं दीर्घघंटानिनादवत् ॥ अवाच्यप्रणवस्याग्रं यस्तं वेद स वेदविदिति ॥ ३३ ॥ तैलधारामि
अव वैच्छिन्नं संततधारावद्विच्छेदरहितं दीर्घघंटानिनादवदिति दीर्घघंटाध्वन्यग्रैर्विच्छेदरहि वा
तमवाच्यमवाङ्मनसगोचरं प्रणवस्याकारोंकारमकारविंदुनादकलात्मकस्यसकल
वेदसारस्याग्रं लक्ष्यं ब्रह्म यो वेद स वेदवित्सर्ववेदार्थज्ञानिनान्य इत्यर्थः ॥ तत्त्वज्ञानिनः स
माधिसाधनस्वरूपमाह ॥ ॥ आत्मानमरणीं कृत्वा प्रणवं चोत्तरारणिं ॥ ध्याननिर्मथना
भ्यासाद्देवं पश्यन्निगूढवत् ॥ ३४ ॥ आत्मानं कर्तृत्वाद्यध्यासवंतं जीवमरणीं कृत्वा धरार
णीं भावयित्वा प्रणवं परमात्मप्रतिपादकं शब्दं उत्तरारणीं कृत्वा भावयित्वा ध्याननिर्मथ १
नाभ्यासाद्ध्यानरूपमथनेनैः ... पुण्येन एवं पूर्वोक्तप्रकारेण निगूढवत् पांडित्यात्प्रगट

पोनः ९ नै २

(10A)

म
नेनयोवर्त्तितेसएवपरमात्मानंपरश्येन्नान्यइत्यर्थः॥यावदेवंपरोक्षानुभवपर्यंतंस्व
प्रकाशाब्रह्मधारणमाह॥ ॥तादृशंपरमंरूपंस्मरेत्पार्थह्यनन्यधीः॥ विधूमाग्निनिभं
देवंपश्येदसंतनिर्मलं॥ २५॥ हेपार्थविधूमाग्निनिभंविगतधूमाग्निशिखावद्योतमान
मस्पंतनिर्मलंअतिस्वच्छंदेवंस्वयंप्रकाशंपरमात्मानंयावत्पश्येत्॥अपरोक्षीकुर्या
त्तावत्तादृश्यंपरममुत्कृष्टंरूपंब्रह्मस्वरूपंनचान्यधीः॥अनन्यचित्तःसन्संस्मरेद्ब्र
ह्मधारणंकुर्यादित्यर्थः॥भावनाप्रकारमेवब्रह्मस्वरूपप्रगटनव्याजेनविशदयति॥ ॥
दूरस्थोपिनदूरस्थःपिंडस्थःपिंडवर्जितः॥ विमलःसर्वदादेहिसर्वव्यापिनिरंजनः॥२६॥
देहिजीवःसर्वदासर्वस्मिन्कालेदूरस्थोपि॥अज्ञस्य परोक्षवत्॥स्थितोपिनदूरस्थः
परोक्षस्थितोनभवति। किंतुसर्वदापरोक्षएवेत्यर्थः॥पिंडस्थोपिअज्ञस्यशरिरसंबंधा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com